# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**FIRST YEAR [2015-18]**
**B.A./B.Sc. FIRST SEMESTER (July – December) 2015**
**Mid-Semester Examination, September 2015**

Date : 14/09/2015 **SANSKRIT (Honours)**
Time : 11 am – 1 pm Paper : I Full Marks : 50

1. Explain fully 'रीतिरात्मा काव्यस्य' state in this connection, different types of Rīti as mentioned by Vāmana.[10]

2. यथेच्छ**मेकस्य** व्याख्या कार्या। [8]
   क) दयित! त्वत्प्रसादादद्य मे चरितार्था श्रोत्रवृत्ति:। अद्य मे मनसि तमोपहस्त्वया दत्तो ज्ञानप्रदीप:।
   ख) सुप्तयोस्तु तयो: स्वप्ने विसगुणनिगडितपादो जरठ: कश्चिज्जालपादोऽदृश्यत।

3. **एका** व्याख्या कार्या। [8]
   क) आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
   बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेत:।।
   ख) सरसिजमनुविद्धं शैवलेनापि रम्यं
   मलिनमपि शिमांशोर्लक्ष्म लक्ष्मीं तनोति।
   इयमधिकमनोज्ञा वल्कलेनापि तन्वी
   किमिव हि मधुराणां मण्डनं नाकृतीताम्।।

4. अनुवाद: करणीय:। [5]
   या सृष्टि: स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
   ये द्वे कालं विधत्त: श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
   यामाहु: सर्वबीजप्रकृतिरिति यया प्राणिन: प्राणवन्त:
   प्रत्यक्षाभि: प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीश:।।

5. यस्यां कस्यामपि भाषायामनुवाद: कार्य:। [4]
   यस्य मनसि धर्मेण, कोपे यमेन, प्रसादे धनदेन, प्रतापे वह्निना, भुजे भुवा, दृशि श्रिया, वाचि सरस्वत्या, मुखे शशिना, बले मरुता, प्रज्ञायां सुरगुरुणा रूपे मनसिजेन तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य।

6. उदाहरणेन सह अधोनिर्दिष्टस्य छन्दसो लक्षणस्य व्याख्यानं कार्यम्। [5]
   द्रुतविलम्बितम्

7. छन्दो निरूपणीयम्। [5]
   भानु: सकृद्युक्ततुरङ्ग एव
   रात्रिन्दिवं गन्धवह: प्रयाति।
   शेष: सदैवाहितभूमिभार:
   षष्ठांशवृत्तेरपि धर्म एष:।।

8. कारिकाव्याख्या करणीया। [5]
   भूम–निन्दा–प्रशंसासु नित्ययोगेऽतिशायने।
   संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादय:।।

——— × ———